भंते ! तिरियलोगस्स आयाममज्झे पण्णत्ते ?' हे भदन्त ! कुत्र खलु स्थाने तिर्यग्लोकस्य आयाममध्यं-दैर्घ्यमध्यभागः प्रज्ञप्तम् ? भगवानाह-'गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स बहुमज्जदेसभाए इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु, एत्थ णं तिरियलोगस्स मज्झे अट्ठ पएसिए रुयए पण्णत्ते' हे गौतम ! जम्बूद्वीपे द्वीपे, मन्दरस्य पर्वतस्य बहुमध्यदेशभागे मेरुपर्वतसममध्यभागे इत्यर्थः, अस्याः रत्नप्रभायाः पृथिव्याः उपरिमाधस्तात्-उपरितनाधस्तनयोः, क्षुद्रकप्रतरयोः, सर्वापेक्षया लघुप्रदेशप्रतरयोरित्यर्थः, अत्र खलु-रत्नप्रभा पृथिव्याः उपर्यधः क्षुद्रकप्रतरद्वयसमीपे, तिर्यग्लोकस्य मध्यं-मध्यभागरूपः अष्टप्रदेशिको रुचकः प्रज्ञप्तः, स एवाष्टप्रदेशिको रुचकस्तिर्यग्लोकायाममध्यं भवति, तथा लोकस्य वज्रमध्यसंस्थानत्वाद् रत्नप्रभायाः रत्नकाण्डे सर्वक्षुद्रकंप्रतरद्वयमस्ति, ययोश्चोपरितनः प्रतरो-यत आरभ्य लोकस्योपरिमुखावृद्धिः, अथ च अधस्तनः प्रतरो-

---

भाग सनत्कुमार और माहेन्द्रकल्प के ऊपर और ब्रह्मलोककल्प के नीचे रिष्टविमान प्रतर के समीप में है। अब गौतम प्रभु से ऐसा पूछते हैं-'कहि णं भंते ! तिरियलोयस्स आयाममज्झे पण्णत्ते' हे भदन्त ! तिर्यग्लोक की लम्बाई का मध्यभाग कहां पर कहा गया है ? उत्तर में प्रभु कहते हैं-'गोयमा ! हे गौतम ! 'जंबूद्दीवे दीवे मंदरस्स पव्वयस्स बहुमज्झदेसभाए इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु, एत्थणं तिरियलोगस्स मज्झे अट्ठपएसिए रुयए पण्णत्ते' जंबूद्वीप नामके द्वीप में मंदरपर्वत के सममध्यभाग में इस रत्नप्रभा-पृथिवी के ऊपर नीचे के दो क्षुद्रक प्रतरों के समीप में तिर्यग्लोक का मध्यभाग रूप अष्टप्रदेशिक रुचक कहा गया है। यह अष्टप्रदेशिक रुचक ही तिर्यग्लोग की लम्बाई का मध्यभाग है। लोक का वज्र के

- પ્રમાણુ કરતાં થોડા ઓછા છે. તેનો મધ્યભાગ સનત્કુમાર અને માહેન્દ્ર કલ્પની ઉપર અને બ્રહ્મલોક કલ્પની નીચે રિષ્ટવિમાન પ્રતરની સમીપમાં છે.

ગૌતમ સ્વામીનો પ્રશ્ન-" कहिणं भंते ! तिरियलोयस्स आयाममज्झे पण्णत्ते ?" હે ભગવન્ ! તિર્યગ્લોકની લંબાઈનો ભાગ કયાં કહ્યો છે ?

મહાવીર પ્રભુનો ઉત્તર-" गोयमा ! હે ગૌતમ ! " जबुद्दीवे दीवे मन्दरस्स पव्वयस्स बहुमज्झदेसभाए इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु, एत्थ णं तिरियलोगस्स मज्झे अट्ठपएसिए रुयए पण्णत्ते " જંબૂદ્વીપ નામના દ્વીપમાં મંદર પર્વતના સમમધ્યભાગમાં આ રત્નપ્રભા પૃથ્વીની ઉપર નીચેના બે ક્ષુદ્રક પ્રતરોની સમીપમાં તિર્યગ્લોકના મધ્યભાગ રૂપ અષ્ટપ્રદેશિક રુચક આવેલ છે. આ અષ્ટપ્રદેશિક રુચક જ તિર્યગ્લોકની લંબાઈનો મધ્યભાગ છે. લોકનું સંસ્થાન વજ્રના મધ્યભાગ જેવું છે-રત્નપ્રભાના રત્નકાંડમાં

यत आरभ्य लोकस्याधोमुखावृद्धिश्च भवतः, तयोरुपरितनाधस्तनयोः क्षुद्रकप्रतरयोः-सर्वलघुप्रदेशप्रतरयोः-समीपे अष्टप्रदेशिकरुचकस्तिर्यग्लोकमध्यभागरूपः प्रज्ञप्त इतिफलितम्। कीदृशोऽसावष्टप्रदेशिको रुचकः ? इत्याह-'जओ णं इमाओ दसदिसाओ पवहंति, तं जहा-पुरत्थिमा, पुरत्थिमदाहिणा, एवं जहा दसमसए नामधेज्ज त्ति' यतः खलु यस्मात् किल अष्टप्रदेशिकात् रुचकात् इमाः प्रदर्श्यमानाः दशदिशः प्रवहन्ति-निस्सरन्ति, तद्यथा-पौरस्त्या-पूर्वा दिक् पौरस्त्यदक्षिणा-आग्नेयी विदिक्, एवं-रीत्या, यथा दशमशतके प्रथमोद्देशके नामधेयमस्ति तथैवात्रापि तन्नामधेयं विज्ञेयम्, तथा च-दक्षिणा दिक्, दक्षिणपश्चिमा नैर्ऋती विदिक्, पश्चिमा दिक्, पश्चिमोत्तरा-वायव्या विदिक्, उत्तरादिक्, उत्तरपौरस्त्या ऐशानी विदिक्, ऊर्ध्वम्, अधश्च, इत्येवं तासां दशानां दिशां नामधेयानि अवसेयानीति भावः ॥सू० ५॥

मध्य जैसा संस्थान है-रत्नप्रभा के रत्नकाण्ड में सर्वक्षुद्रक दो प्रतर हैं। इनमें जो ऊपर का प्रतर है सो यहां से लेकर लोक ऊपर मुखवृद्धि होती है। और नीचे का जो प्रतर है सो यहां से लेकर लोक की अधोमुखवृद्धि होती है। इन उपरितन अधस्तन दोनों क्षुद्रकप्रतरों के पास अष्टप्रदेशिक रुचक है। सो वह रुचक तिर्यग्लोक का मध्यभाग कहा गया है। यह रुचक कैसा है? सो इसके लिये कहा गया है कि इस अष्टप्रदेशिक रुचक से 'इमाओ दस दिसाओ पवहंति-तंजहा-पुरत्थिमा, पुरत्थिमदाहिणा-एवं जहा दसमसए नामधेज्जंत्ति' ये दश दिशाएँ निकली हैं-उनके नाम इस प्रकार से हैं-पूर्वदिशा, पूर्वदक्षिणदिशाका कोना-आग्नेयी विदिशा, दक्षिणदिशा, दक्षिणपश्चिमदिशा का कोना-

---

સર્વક્ષુદ્રક બે પ્રતર છે. આ બન્ને પ્રતરોમાંનું જે ઉપરનું પ્રતર છે ત્યાંથી લઈને લોકની ઉપર મુખાવૃદ્ધિ થાય છે, અને નીચેનું જે પ્રતર છે ત્યાંથી લઈને લોકના અધોમુખા વૃદ્ધિ થાય છે. તે ઉપરિતન-અધસ્તન બન્ને પ્રતરોની પાસે અષ્ટપ્રદેશિક રુચક છે. તે રુચક જ તિર્યગ્લોકના મધ્યભાગ રૂપ છે. તે રુચક કેવું છે ? આ પ્રશ્નનો જવાબ એવો છે કે-આ અષ્ટપ્રદેશિક રુચકમાંથી "इमाओ दस दिसाओ पवहति, तंजहा-पुरत्थिमा, पुरत्थिमादाहिणा, एवं जहा दसमसए नामधेज्जंति" આ દસ દિશાઓ નીકળી છે-પૂર્વદિશા, પૂર્વ અને દક્ષિણ દિશા વચ્ચેની આગ્નેયી વિદિશા (અગ્નિકોણ), દક્ષિણદિશા, દક્ષિણ અને પૂર્વ વચ્ચેની નૈઋત્ય વિદિશા, પશ્ચિમદિશા, પશ્ચિમ અને ઉત્તર વચ્ચેની વાયવ્ય વિદિશા, ઉત્તરદિશા, ઉત્તર અને પૂર્વની વચ્ચેની ઈશાન

दिग्विदिक्प्रवहद्वारवक्तव्यता।

मूलम्–"इमा णं भंते! दिसा किमाइया, किं पवहा, कइपदेसाइया, कइपदेसुत्तरा, कइपदेसिया, किं पज्जवसिया, किं संठिया पण्णत्ता? गोयमा! इंदाणं दिसा रुयगाइया, रुयगप्पवहा, दुप्पएसाइया, दुप्पएसुत्तरा, लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया सपज्जवसिया, अलोगं पडुच्च साइया, अपज्जवसिया, लोगं पडुच्च सुरजसंठिया, अलोगं पडुच्च सगडुद्धिसंठिया पण्णत्ता। अग्गेयी णं भंते! दिसा किमाइया, किं पवहा, कइपएसाइया, कइपएसविस्थिन्ना, कइपएसिया, किं पज्जवसिया, किं संठिया पण्णत्ता? गोयमा! अग्गेयी णं दिसा रुयगाइया, रुयगप्पवहा, एगपएसाइया, एगपएसविस्थिन्ना, अणुत्तरा, लोगं पडुच्च असंखेज्ज पएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया सपज्जवसिया, अलोगं पडुच्च साइया अपज्जवसिया, छिन्नमुत्तावलिसंठिया पण्णत्ता। जमा जहा इंदा। नेरई जहा अग्गेयी। एवं जहा इंदा तहा दिसाओ चत्तारि जहा अग्गेयी तहा चत्तारि वि विदिसाओ। विमला णं भंते! दिसा किमाइया० पुच्छा? जहा अग्गेयी। गोयमा! विमला णं दिसा

नैर्ऋत्यविदिशा, पश्चिमदिशा, पश्चिम उत्तरदिशा को कोना वायव्यविदिशा, उत्तरदिशा, तथा उत्तरपूर्वदिशाका कोना ईशान विदिशा। ऊर्ध्वदिशा और अधोदिशा इस प्रकार से उनके ये नाम हैं। इस प्रकार का वर्णन दशमशतक के प्रथम उद्देशक में किया गया है॥ ५॥

इति लोकमध्याद्वारवक्तव्यता॥

વિદિશા, ઉર્ધ્વદિશા અને અધોદિશા. આ પ્રમાણે દશમાં શતકના પહેલા ઉદ્દેશામાં દિશાઓનું વર્ણન કરવામાં આવેલું છે. ॥સૂ૦૫॥

॥ લોકમધ્યદ્વાર વકતવ્યતા સંપૂર્ણ॥

रुयगाइया, रुयगप्पवहा, चउप्पएसाइया, चउप्पएसविस्थिन्ना, अणुत्तरा लोगं पडुच्च, सेसं जहा अग्गेयी, नवरं रुयगसंठिया पण्णत्ता, एवं तमा वि ॥सू० ६॥

छाया—ऐन्द्री खलु भदन्त! दिक् किमादिका, किं प्रवहा, कति प्रदेशादिका, कतिप्रदेशोत्तरा, कतिप्रदेशिका, किं पर्यवसिता, किं संस्थिता प्रज्ञप्ता ? गौतम ! ऐन्द्री खलु दिक् रुचकादिका, रुचकप्रवहा, द्विप्रदेशादिका, द्विप्रदेशोत्तरा, लोकं प्रतीत्य असंख्येयप्रदेशिका, अलोकं प्रतीत्य अनन्तप्रदेशिका, लोकं प्रतीत्य सादिका सपर्यवसिता, अलोकं प्रतीत्य सादिका अपर्यवसिता, लोकं प्रतीत्य मुरजसंस्थिता, अलोकं प्रतीत्य शकटोर्धः संस्थिता प्रज्ञप्ता। आग्नेयी खलु भदन्त! दिक् किमादिका, किं प्रवहा, कति प्रदेशादिका, कतिप्रदेशविस्तीर्णा, कतिप्रदेशिका, किं पर्यवसिता, किं संस्थिता प्रज्ञप्ता ? गौतम ! आग्नेयी खलु दिक् रुचकादिका, रुचकप्रवहा, एकप्रदेशादिका, एकप्रदेशविस्तीर्णा, अनुत्तरा, लोकं प्रतीत्य असंख्येयप्रदेशिका, अलोकं प्रतीत्य अनन्तप्रदेशिका, लोकं प्रतीत्य सादिका सपर्यवसिता, अलोकं प्रतीत्य सादिका अपर्यवसिता, छिन्नमुक्तावलीसंस्थिता प्रज्ञप्ता। याम्या यथा ऐन्द्री। नैर्ऋती यथा आग्नेयी। एवं यथा ऐन्द्री तथा दिशश्चतस्रः, यथा आग्नेयी तथा चतुरोऽपि विदिशः। विमला खलु भदन्त! दिक् किमादिका: ? पृच्छा, यथा आग्नेयी, गौतम! विमला खलु दिक् रुचकादिका, रुचकप्रवहा, चतुष्प्रदेशादिका, चतुष्प्रदेशविस्तीर्णा, अनुत्तरा, लोकं प्रतीत्य शेषं यथा आग्नेयी, नवरं रुचकसंस्थिता प्रज्ञप्ता, एवं तमाऽपि ॥ सू० ६ ॥

टीका—अथ षष्ठं दिक् विदिक् प्रवहद्वारमाह—'इंदा णं भंते' इत्यादि। इंदा णं भंते! दिसा किमाइका, किं पवहा, कइपएसाइया, कइपएसुत्तरा, कइपएसिया,

दिग्विदिक् प्रवहद्वारवक्तव्यता ॥

'इंदा णं भंते! दिसा किमाइया' इत्यादि।

टीकार्थ—इस सूत्र द्वारा सूत्रकार ने दिक् विदिक् प्रवहद्वार का निरूपण किया है—इस में गौतमने प्रभु से ऐसा पूछा है—'इंदा णं भंते! दिसा' हे भदन्त! ऐन्द्री दिशा—पूर्वदिशा (किमाइया) क्या आदिवाली

—દિગ્વિદિક્ પ્રવહદ્વાર વક્તવ્યતા—

"इंदा णं भंते! दिसा किमाइया" ઇત્યાદિ—

ટીકાર્થ—સૂત્રકારે આ સૂત્રમાં દિક્ વિદિક્ પ્રવહદ્વારનું નિરૂપણ કર્યું છે. ગૌતમ સ્વામી મહાવીર પ્રભુને એવો પ્રશ્ન પૂછે છે કે—" इंदा णं भंते! दिसा किमाइया ?" હે ભગવન્! ઐન્દ્રીદિશા (પૂર્વદિશા) શું આદિવાળી છે ? એટલે

किं पज्जवसिया, किं संठिया पण्णत्ता ? गौतमः पृच्छति-हे भदन्त ! ऐन्द्री खलु प्राची पूर्वा दिक् किमादिका-क आदिः प्रथमो यस्याः सा किमादिका ? आदिश्च विवक्षया वैपरीत्येनापि स्यादत आह-किं पवहा-प्रवहति-निस्सरति अस्मादिति प्रवहः, कः प्रवहो निर्गममूलं यस्याः सा किं पवहा ? कति प्रदेशादिका कति प्रदेशाः आदिर्यस्याः सा कति प्रदेशादिका ? कतिप्रदेशोत्तरा-कतिप्रदेशा उत्तरे-वृद्धौ यस्याः सा कतिप्रदेशोत्तरा ? कतिप्रदेशिका-कतिप्रदेशाः यस्याः सा कतिप्रदेशिका ? किं पर्यवसिता-किं पर्यवसितम्-अवसानं यस्याः सा किं पर्यवसिता-किमवसाना ? किं संस्थिता-किं संस्थितं-संस्थानं यस्याः सा किं संस्थिता-किमाकारा प्रज्ञप्ता ? भगवानाह-' गोयमा ! इंदाणं दिसा रुयगाइया, रुयगप्पवहा, दुप्पएसाइया, दुप्पएसुत्तरा लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया, सपज्जवसिया, अलोगं पडुच्च साईया अपज्जवसिया, लोगं पडुच्च

है ? अर्थात् इसके पहिले क्या है ? आदिपन विवक्षा वश उल्टेरूप से भी हो सकता है । इसके लिये पूछा गया है कि (किं पवहा) इसके निर्गम का मूल क्या है ? कि जिससे यह निकली है । (कइ पएसाइया) इसकी आदि में कितने प्रदेश हैं ? (कइ पएसुत्तरा) उत्तर में-वृद्धि में इसकी कितने प्रदेश हैं ? (कइ पएसिया) यह कितने प्रदेशोंवाली है ? (किं पज्जवसिया) इसका अन्त कहां है ? (किं संठिया पण्णत्ता) और कैसे आकारवाली यह कही गई है ? इसके उत्तर में प्रभु कहते हैं-'गोयमा' हे गौतम ! 'इंदाणं दिसा रुयगाइया' ऐन्द्रीदिशा-पूर्वदिशा रुचक आदि-वाली है-अर्थात् ऐन्द्रीदिशा के पहिले रुचक है । 'रुयगप्पवहा, दुप्पए-साइया, दुप्पएसुत्तरा, लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया' यह रुचक से निकली है अर्थात्-इसका मूल निर्गम-

---

કે તેની પહેલાં શું છે ? આદિપણાનું કથન ઉલ્ટારૂપે થઇ શકે છે. તે માટે જ પૂછવામાં આવ્યું છે કે-(किं पवहा) તેના નિર્ગમનું મૂળ ક્યાં છે-એટલે કે ક્યાંથી તેનો આરંભ થાય છે ? (कइ पएसाइया) તેની આદિમાં કેટલા પ્રદેશો છે ? (कइ पएसुत्तरा) તેની ઉત્તરમાં (વૃદ્ધિમાં) કેટલા પ્રદેશો છે ? (कइ पएसिया) તે કેટલા પ્રદેશોવાળી છે ? (किं पज्जवसिया) તેનો અન્ત ક્યાં છે ? (किं संठिया पण्णत्ता) તેનો આકાર કેવો કહ્યો છે ?

મહાવીર પ્રભુનો ઉત્તર-" गोयमा ! " હે ગૌતમ ! " इंदाणं दिसा रुय-गाइया " ઐન્દ્રી દિશા (પૂર્વદિશા)નો પ્રારંભ રુચકથી થાય છે એટલે કે તેની પહેલાં રુચક છે. (रुयगप्पवहा दुप्पएसाइया, दुप्पएसुत्तरा, लोगं पडुच्च असं-खेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया) તે રુચકમાંથી નીકળી છે એટલે

मुरजसंठिया, अलोगं पडुच्च सगडुद्धिसंठिया पण्णत्ता' हे गौतम ! ऐन्द्री खलु दिक्, रुचिकादिका-रुचकः आदिर्यस्याः सा रुचकादिका, अतएव रुचकप्रवहा-प्रवहति-निर्गच्छति अस्मात् इति प्रवहः, रुचकः प्रवहो निर्गमस्थानं यस्याः सा रुचकप्रवहा, द्विप्रदेशादिका-द्वौ प्रदेशौ आदौ यस्याः सा द्विप्रदेशादिका, द्विप्रदेशोत्तरा द्वौ प्रदेशौ उत्तरे वृद्धौ यस्याः सा द्विप्रदेशोत्तरा, लोकं प्रतीत्य-आश्रित्य लोकापेक्षयेत्यर्थः असंख्येयप्रदेशिका-असंख्येयाः प्रदेशा यस्याः सा असंख्येयप्रदेशिका, अलोकं प्रतीत्य-आश्रित्य-अलोकापेक्षया इत्यर्थः, अनन्तप्रदेशिकाः-अनन्ताः प्रदेशाः यस्याः सा अनन्तप्रदेशिका, लोकं प्रतीत्य-आश्रित्य लोकापेक्षयेत्यर्थः सादिका-आदिसहिता, सपर्यवसिता-सावसाना, अलोकं प्रतीत्य-आश्रित्य, अलोकापेक्षयेत्यर्थः, सादिका अपर्यवसिता, न सान्ता, लोकं प्रतीत्य-अपेक्ष्य लोकापेक्षयेति भावः मुरजसंस्थिता-मुरजस्य-मृदङ्गस्य संस्थितं-संस्थानम् आकारो यस्याः सा तथाविधा, तथा च लोकान्तस्य परिमण्डलाकारत्वेन दिशो मुरजसंस्थानता संभवति, अतएव लोकान्तं प्रतीत्य-आश्रित्य मुरजसंस्थितेत्युक्तम्, अलोकं प्रतीत्य-आश्रित्य-अलोकापेक्षयेत्यर्थः, शकटोद्धिसंस्थिता शकटस्य

द्वार रुचक है। इसकी आदि में दो प्रदेश हैं। यह द्विप्रदेशोत्तर है अर्थात् यह दो प्रदेशों की वृद्धिवाली है। लोक की अपेक्षा से यह असंख्यात प्रदेशोंवाली है। अलोक की अपेक्षा से यह अनन्तप्रदेशों-वाली है, तथा लोक की अपेक्षा से यह आदिसहित है। और अवसान सहित है, अलोक की अपेक्षा से यह सादि अपर्यवसित है। लोक की अपेक्षा से इसका आकार मृदङ्ग के आकार जैसा है, क्योंकि लोक परिमण्डलाकार है, इसलिये दिशा में मुरजाकारता-मृदङ्गाकारता बन जाती है। इसीलिये यहां उसका आकार मृदङ्ग के आकार जैसा कहा गया है। अलोक की अपेक्षा से यह-शकटौधिसंस्थानवाली है अर्थात्

કે તેનું મૂળ નિર્ગમદ્વાર રુચક છે. તેની આદિમાં બે પ્રદેશ છે અને તે દ્વિપ્રદેશોત્તર છે, એટલે કે તે બે પ્રદેશોની વૃદ્ધિવાળી છે. લોકની અપેક્ષાએ તે અસંખ્યાત પ્રદેશોવાળી છે, અલોકની અપેક્ષાએ તે અનંત પ્રદેશોવાળી છે. તથા લોકની અપેક્ષાએ તે આદિસહિત છે અને અવસાનસહિત છે. અલોકની અપેક્ષાએ તે સાદિ સપર્યવસિત છે. લોકની અપેક્ષાએ તેનો આકાર મૃદંગના જેવો છે. લોક પરિમંડલાકાર હોવાથી દિશામાં મૃદંગાકારતા સંભવી શકે છે, તેથી જ તેનો આકાર મૃદંગના આકાર જેવો કહ્યો છે. અલોકની અપેક્ષાએ તે શકટોધિ આકારવાળી છે. એટલે કે ગાડાની આગળ જે લાકડાનો

ओधिरिव लम्बायमानशकटाग्रभागवत् संस्थितं-संस्थानम्-आकारो यस्याः सा तथाविधा, प्रज्ञप्ता-भणिता, गौतमः पृच्छति-'अग्गेयी णं भंते ! दिसा किमाइया, किं पवहा, कइपदेसाइया, कइपदेसवित्थिन्ना, कइपएसिया, किं पज्जवसिया, किं संठिया पण्णत्ता ?' हे भदन्त ! आग्नेयी खलु दिक्-विदिगित्यर्थः, किमादिका कः आदिर्यस्याः सा किमादिका, किं प्रवहा-कः प्रवहो निर्गममूलस्थानं यस्याः सा किं प्रवहा, कतिप्रदेशादिका, कतिप्रदेशविस्तीर्णा-कतिप्रदेशविस्तृता, कतिप्रदेशिका, किं पर्यवसिता-किमवसाना, किं संस्थिता-किमाकारा, प्रज्ञप्ता ? भगवानाह-' गोयमा ! अग्गेयीणं दिसा रुयगाइया, रुयगप्पवहा, एगपएसाइया, एगपएसवित्थिन्ना अणुत्तरा लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया सपज्जवसिया, अलोगं पडुच्च साइया अपज्जव-

---

-गाडी के आगे का जो लम्बाकाठ होता है-सो इस काठ के अग्रभाग के जैसा इसका आकार है। अब गौतमस्वामी प्रभु से ऐसा पूछते हैं-'अग्गेयी णं भंते ! दिसा किमाइया, किं पवहा, कइपएसा, कइपएसवित्थिन्ना, कइपएसिया, किं पज्जवसिया, किं संठिया, पण्णत्ता' हे भदन्त ! आग्नेयी विदिशा, किस आदिवाली है, इसके निर्गम का मूलस्थान कौन है ? कितने प्रदेशों में यह विस्तीर्ण है ? कितने प्रदेशोंवाली यह है ? यह किस अन्तवाली है ? और कैसा इसका आकार है ? इसके उत्तर में प्रभु कहते हैं-'गोयमा' हे गौतम ! 'अग्गेयी णं दिसा रुयगाइया, रुयगप्पवहा, एगपएसाइया, एगपएसवित्थिन्ना, अणुत्तरा लोगं पडुच्च, असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया, सपज्जवसिया अलोगं पडुच्च साइया अपज्जवसिया, छिण्णमुत्तावली

લાંબો લાંબો ભાગ હોય છે તેને "શકટોધિ" કહે છે. પૂર્વદિશાનો આકાર આ શકટોધિ જેવો છે.

ગૌતમ સ્વામીનો પ્રશ્ન-"अग्गेयीणं भंते ! दिसा किमाइगा, किं पवहा, कइपएसाइया, कइपएसवित्थिन्ना, कइ पएसिया, किं पज्जवसिया, किं संठिया पण्णत्ता ?" હે ભગવન્ ! આગ્નેયી વિદિશા (અગ્નિકોણ) કયા આદિવાળી છે? તેનું નિર્ગમસ્થાન-મૂળ-કયાં છે ? તે કેટલા પ્રદેશોમાં વિસ્તીર્ણ છે ? તે કેટલા પ્રદેશોવાળી છે ? તે કયા અન્તવાળી છે ? તેનો આકાર કેવો છે ?

મહાવીર પ્રભુનો ઉત્તર-"गोयमा ! હે ગૌતમ ! "अग्गेयीणं दिसा रुयगाइया, रुयगप्पवहा, एगपएसाइया, एगपएसवित्थिन्ना, अणुत्तरा, लोगं पडुच्च असंखेज्जपएसिया, अलोगं पडुच्च अणंतपएसिया, लोगं पडुच्च साइया, सपज्जवसिया अलोगं पडुच्च साइया अपज्जवसिया छिण्णमुत्तावली संठिया पण्णत्ता" અગ્નિવિદિશા રુચક આદિ વાળી છે, એટલે કે રુચકથી શરૂ

सिया, छिन्नमुत्तावलिसंठिया पण्णत्ता' हे गौतम ! आग्नेयी खलु दिक्-विदिगित्यर्थः, रुचकादिका-रुचकः आदिर्यस्याः सा तथाविधा, रुचकप्रवहा रुचकः प्रवहो यस्याः सा तथाविधा, एकप्रदेशादिका-एकः प्रदेशः आदिर्यस्याः सा तथाविधा, एकप्रदेशविस्तीर्णा-एकः प्रदेशो विस्तीर्णो-विस्तृतो यस्याः सा तथाविधा, यतः अनुत्तरा-वृद्धिवर्जिता, अतएव एकप्रदेशविस्तीर्णा प्रति भावः। लोकं प्रतीत्य आश्रित्य असंख्येयप्रदेशिका, अलोकं प्रतीत्य अपेक्ष्य, अलोकापेक्षयेत्यर्थः, अनन्तप्रदेशिका, लोकान्तं प्रतीत्य आश्रित्य सादिका सपर्यवसिता-सादिसान्ता, अलोकं प्रतीत्य-आश्रित्य, सादिका-आदिसहिता अपर्यवसिता-अन्तरहिता, छिन्नमुक्तावलिसंस्थिता-विकीर्णमुक्तावलीवत् संस्थितं-संस्थानम् आकारो यस्याः सा तथाविधा प्रज्ञप्ता। 'जमा जहा इंदा, नेरई जहा अग्गेयी, एवं जहा इंदा तहा दिसाओ चत्तारि, जहा अग्गेयी तहा चत्तारि वि विदिसाओ' याम्या-दक्षिणा दिग् यथा ऐन्द्री पूर्वादिक् प्रतिपादिता तथैव प्रतिपत्तव्या,

---

संठिया पण्णत्ता' આગ્નેયી વિદિશા રુચક આદિવાળી છે, અર્થાત્ इस दिशा के पहिले रुचक है इसका निर्गमस्थान भी रुचक है। एक प्रदेश आदि है, एक प्रदेश इसका विस्तृत है। क्योंकि यह अनुत्तरा-वृद्धिवर्जित है लोक की अपेक्षा से यह असंख्यात प्रदेशोंवाली है, अलोक की अपेक्षा से यह अनन्तप्रदेशोंवाली है। तथा लोक की अपेक्षा से यह सादि सपर्यवसित है, अलोक की अपेक्षा से यह आदिसहित और अन्त-रहित है। तथा इसका आकार विकीर्णमुक्तावली के जैसा है 'जमा जहा इंदा, नेरई जहा अग्गेयी, एवं जहा इंदा तहा दिसाओ चत्तारि, जहा अग्गेयी तहा चत्तारि वि विदिसाओ' दक्षिणदिशा पूर्वदिशा के जैसी कथनवाली है, नैर्ऋती विदिशा आग्नेयी विदिशा के जैसी कथनवाली

થાય છે–તેની પહેલાં રુચક છે, તેનું નિર્ગમસ્થાન પણ રુચક છે, એક પ્રદેશ તેનો આદિ છે, તેનો એક પ્રદેશ વિસ્તૃત છે કારણ કે તે અનુત્તરા (વૃદ્ધિરહિત) છે. લોકની અપેક્ષાએ તે અસંખ્યાત પ્રદેશોવાળી છે, અને અલોકની અપેક્ષાએ અનંતપ્રદેશોવાળી છે લોકની અપેક્ષાએ તે આદિ (આદિસહિત) અને સપર્યવસિત (અન્તવાળી) છે અને અલોકની અપેક્ષાએ તે સાદિ અને અન્તરહિત છે, તથા તેનો આકાર વિકીર્ણ મુક્તાવલીના જેવો છે. "जमा जहा इंदा, नेरई जहा अग्गेयी, एवं जहा इंदा तहा दिसाओ चत्तारि, जहा अग्गेयी तहा चत्तारि वि विदिसाओ" પૂર્વદિશાના જેવું જ કથન દક્ષિણ દિશાનું સમજવું અગ્નિ વિદિશાના જેવું જ કથન નૈર્ઋત્ય દિશા

नैर्ऋती विदिक् यथा आग्नेयी विदिक् प्रतिपादिता तथैव प्रतिपत्तव्या, एवं पूर्वोक्त रीत्या, यथा ऐन्द्री दिक् प्ररूपिता तथैव दिशश्चतस्रः पूर्वा दक्षिणा पश्चिमा उत्तरा च प्ररूपणीया, एवं यथा आग्नेयी विदिक् प्रतिपादिता तथा चतस्रोऽपि नैर्ऋती, वायव्या, ऐशानी, आग्नेयी च प्रतिपत्तव्या । गौतमः पृच्छति-'विमलाणं भंते ! दिसा किमाइया पुच्छा जहा अग्गेयीए ?' हे भदन्त ! विमला खलु ऊर्ध्वदिक् किमादिका-कः आदिर्यस्याः सा तथाविधा, किं प्रवहा, कति प्रदेशादिका कति प्रदेशोत्तरा, कतिप्रदेशिका, किं पर्यवसिता, किं संस्थिता प्रज्ञप्ता इति पृच्छा यथा आग्नेय्या विदिशः पृच्छा कृता तथा विमलायाः पृच्छा कर्त्तव्या । भगवानाह-

---

है । इसी प्रकार जैसा कथन पूर्वदिशा के संबंध में किया गया है इसी प्रकार का कथन शेष दिशाओं के संबंध में अर्थात् दक्षिण पश्चिम और उत्तर दिशाओं के संबंध में और जैसा कथन में आग्नेयीविदिशा के संबंध में किया गया है वैसा ही कथन शेष तीन विदिशाओं के नैर्ऋती वायव्य और ऐशानी के संबंध में भी करना चाहिये । अब गौतम-स्वामी प्रभु से ऐसा पूछते हैं-'विमला णं भंते ! दिसा किमाइया० पुच्छा -जहा अग्गेयीए' हे भदन्त ! विमला-ऊर्ध्वदिशा किस प्रकारके आदि-वाली है ? इसके निर्गम का मूल कौन है ? इसकी आदि में कितने प्रदेश हैं ? वृद्धि में इसके कितने प्रदेश हैं ? यह स्वयं कितनी प्रदेशों-वाली है ? इसका अंत कहां है ? कैसा इसका आकार है ? इस प्रकार से जैसे प्रश्न पहिले आग्नेयी विदिशा के संबंध में किये गये हैं वैसे ही प्रश्न इस विमला दिशा के संबंध में भी ये किये हैं । इसके उत्तर में प्रभु

વિષે સમજવું આ પ્રકારે જેવું કથન પૂર્વ દિશા વિષે કરવામાં આવ્યું છે, એવું જ કથન બાકીની દિશાઓ-દક્ષિણ, પશ્ચિમ અને ઉત્તર દિશા વિષે સમજવું અગ્નિવિદિશા વિષે જેવું કથન કરવામાં આવ્યું છે, એવું જ કથન બાકીની વિદિશાઓ-નૈઋંત્ય, વાયવ્ય અને ઈશાન-વિષે સમજવું.

ગૌતમ સ્વામીનો પ્રશ્ન-" विमलाणं भंते ! दिसा किमाइया० पुच्छा-जहा अग्गेयीए " હે ભગવન્ ! વિમલા દિશા (ઉર્ધ્વ દિશા) કયા આદિ વાળી છે ? તેના નિર્ગમનું મૂળ કયાં છે ? તેની આદિમાં કેટલા પ્રદેશ છે ? વૃદ્ધિમાં કેટલા પ્રદેશ છે ? તે પોતે કેટલા પ્રદેશોવાળી છે ? તેનો અન્ત કયાં છે ? તેનો આકાર કેવો છે ? આ પ્રકારે જેવા પ્રશ્નો અગ્નિવિદિશા વિષે પૂછવામાં આવ્યા છે, એવા જ પ્રશ્નો ઉર્ધ્વ દિશા વિષે પણ પૂછવામાં આવ્યા છે.

'गोयमा ! विमला णं दिसा रुयगाइया, रुयगप्पवहा, चउप्पएसाइया; चउप्पएसवित्थिन्ना अणुत्तरा, लोगं पडुच्च, सेसं जहा अग्गेयीए, नवरं रुयगसंठिया पण्णत्ता, एवं तमा वि ' हे गौतम ! विमला खलु ऊर्ध्वादिक् रुचकादिका, रुचकआदिर्यस्याः सा तथाविधा, रुचकप्रवहा–रुचकः प्रवहो–निर्गममूलस्थानं यस्याः सा तथाविधा, चतुष्प्रदेशादिका चत्वारः प्रदेशा आदिर्यस्याः सा तथाविधा, चतुष्प्रदेशविस्तीर्णा चत्वारः प्रदेशाः विस्तीर्णाः–विस्तृताः यस्याः सा तथाविधा चतुष्प्रदेशविस्तारवतीत्यर्थः, अनुत्तरा–वृद्धिवर्जिता, लोकं प्रतीत्य–अपेक्ष्य लोकापेक्षयेत्यर्थः असंख्येयप्रदेशिका, अलोकं प्रतीत्य–आश्रित्य अनन्तप्रदेशिका, लोकं प्रतीत्य सादिका सपर्यवसिता, अलोकं प्रतीत्य सादिका अपर्यवसिता प्रज्ञप्ता, नवरं पूर्वापेक्षया विशेषस्तु रुचकसंस्थिता–रुचकाकारा न तु च्छिन्नमुक्तावलीसंस्थिता प्रज्ञप्ता, एवं–रीत्या, तमा अधोदिगपि रुचकादिका, रुचकप्रवहा, चतुष्प्रदेशादिका,

---

कहते हैं–'गोयमा' हे गौतम ! 'विमला णं दिसा रुयगाइया, रुयगप्पवहा, चउप्पएसाइया, चउप्पएसवित्थिन्ना, अणुत्तरा, लोगं पडुच्च सेसं जहा अग्गेयीए' यह विमलादिशा–ऊर्ध्वदिशा रुचक आदिवाली है, इसके निर्गम का मूलस्थान रुचक है, चारप्रदेश इसके आदि हैं चारप्रदेश इसके विस्तीर्ण हैं, वृद्धि से यह वर्जित है, लोक की अपेक्षा से यह असंख्यात प्रदेशोंवाली है, अलोक की अपेक्षा से यह अनन्तप्रदेशवाली है, लोक की अपेक्षा से यह सादि सान्त है और अलोक की अपेक्षा से यह सादि अनन्त है ! पूर्वकथन की अपेक्षा इसके कथन में यदि कोई विशेषता है तो वह ऐसी है कि इस दिशा का आकार रुचक के आकार जैसा है । छिन्नमुक्तावली के जैसा नहीं है । इसी प्रकार का कथन तमो-

---

મહાવીર પ્રભુનો ઉત્તર–"गोयमा !" હે ગૌતમ ! "विमलाणं दिसा रुयगाइया, रुयगप्पवहा, चउप्पएसाइया, चउप्पएसवित्थिन्ना, अणुत्तरा, लोगं पडुच्च सेस जहा अग्गेयीए" વિમલા દિશા (ઉર્ધ્વદિશા) રુચક રૂપ આદિવાળી છે, તેના નિર્ગમનું મૂળસ્થાન રુચક છે. ઉર્ધ્વદિશા આદિમાં ચાર પ્રદેશવાળી છે, તેના ચાર પ્રદેશ વિસ્તીર્ણ છે, તે વૃદ્ધિથી રહિત છે લોકની અપેક્ષાએ તે અસંખ્યાત પ્રદેશોવાળી છે અને અલોકની અપેક્ષાએ અનંત પ્રદેશોવાળી છે. લોકની અપેક્ષાએ તે આદિસહિત અને અન્તસહિત છે, અલોકની અપેક્ષાએ તે સાદિ (આદિ સહિત) અને અનન્ત છે. પૂર્વ કથન કરતાં આ કથનમાં એટલી જ વિશેષતા છે કે આ દિશાનો આકાર રુચકના જેવો છે, છિન્ન મુક્તાવલીના જેવો નથી. ઉર્ધ્વદિશાના જેવું જ કથન તમોદિશા (અધોદિશા) વિષે પણ સમજવું એટલે કે અધોદિશા પણ રુચક

चतुष्प्रदेशविस्तीर्णा, अनुत्तरा वृद्धिवर्जिता लोकं प्रतीत्य असंख्येयप्रदेशिका, अलोकं प्रतीत्य अनन्तप्रदेशिका, लोकान्तं प्रतीत्य सादिका सपर्यवसिता, अलोकं प्रतीत्य सादिका अपर्यवसिता, रुचकाकारा च प्रज्ञप्ता इति भावः ॥ सू० ६ ॥

परिवर्तनद्वारवक्तव्यता ।

मूलम्–"किमयं भंते! लोए त्ति पवुच्चइ? गोयमा! पंचत्थिकाया, एसणं एवइए लोए त्ति पवुच्चइ, तं जहा–धम्मत्थिकाए, अहम्मत्थिकाए, जाव पोग्गलत्थिकाए। धम्मत्थिकाएणं भंते! जीवाणं किं पवत्तइ? गोयमा! धम्मत्थिकाएणं जीवाणं आगमणगमण. भासुम्मेसमणजोगा, वइजोगा, कायजोगा, जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पवत्तंति, गतिलक्खणेणं धम्मत्थिकाए। अहम्मत्थिकाएणं जीवाणं किं पवत्तइ? गोयमा! अहम्मत्थिकाएणं जीवाणं ठाण निसीयण-तुयट्टणमणस्स य एगत्तीभावकरणता जे यावन्ने तहप्पगारा थिरा भावा सव्वे ते अहम्मत्थिकाए पवत्तंति, ठाणलक्खणेणं

दिशा–अधोदिशा के सम्बन्ध में भी करना चाहिये। अर्थात् अधोदिशा भी रुचक आदिवाली है, रुचकरूप निर्गमस्थानवाली है यह चार प्रदेशरूप आदिवाली है, इसके चार प्रदेश विस्तीर्ण हैं, यह वृद्धिवर्जित है, लोक की अपेक्षा से यह असंख्यातप्रदेशोंवाली है, अलोककी अपेक्षा से यह अनन्त-प्रदेशोंवाली हैं, लोककी अपेक्षा यह सादि सान्त है और अलोक की अपेक्षा यह सादि अनन्त है, तथा आकार में रुचक के जैसा आकारवाली है॥६॥

इति दिग्विदिग्प्रवहद्वार वक्तव्यता ॥

રૂપ આદિવાળી છે, તે રુચક રૂપ નિર્ગમસ્થાનવાળી છે, તે ચાર પ્રદેશરૂપ આદિવાળી છે; તેના ચાર પ્રદેશો વિસ્તીર્ણ છે, તે વૃદ્ધિ રહિત છે, લોકની અપેક્ષાએ અસંખ્યાત પ્રદેશોવાળી અને અલોકની અપેક્ષાએ અનંત પ્રદેશો-વાળી છે. લોકાન્તની અપેક્ષાએ તે સાદિ અને સાન્ત છે, પણ અલોકની અપેક્ષાએ તે સાદિ અનન્ત છે, તથા તેનો આકાર રુચક જેવો છે. ॥સૂ૦૬॥

દિગ્વિદિક્ પ્રવહદ્વાર સંપૂર્ણ

अहम्मत्थिकाए! आगासत्थिकाए णं भंते! जीवाणं अजीवाणं य किं पवत्तइ? गोयमा! आगासत्थिकाए णं जीवदव्वाणं य, अजीवदव्वाण य भायणभूए-एगेण वि, से पुन्ने दोहि वि पुन्ने, सयं पि माएज्जा, कोडिएणं वि पुन्ने कोडिसहस्सं पि माएज्जा॥१॥ अवगाहणा लक्खणे णं आगासत्थिकाए, जीवत्थिकाएणं भंते! जीवाणं किं पवत्तइ? गोयमा! जीवत्थिकाए णं जीवे अणंताणं आभिणिबोहियनाणं पज्जवाणं अणंताणं सुयनाणपज्जवाणं एवं जहा बितियसए अत्थिकायउद्देसए जाव उवओगं गच्छइ, उवओगलक्खणेणं जीवे। पोग्गलत्थिकाए णं पुच्छा, गोयमा! पोग्गलत्थिकाए णं जीवाणं ओरालियवेउव्विय आहारए तेयाकम्मए सोइंदियचक्खिंदियघाणिंदियजिब्भिंदिय-फासिंदिय मणजोगवयजोगकायजोगआणापाणूणं च गहणं पवत्तइ, गहणलक्खणे णं पुग्गलत्थिकाए॥सू० ७॥

छाया—किमयं भंते! लोक इति प्रोच्यते? गौतम! पञ्चास्तिकायाः, एष खलु एतावत्को लोक इति प्रोच्यते, तद्यथा-धर्मास्तिकायः, अधर्मास्तिकायः, यावत् पुद्गलास्तिकायः। धर्मास्तिकायः खलु भदन्त! जीवानां किं प्रवर्तते? गौतम! धर्मास्तिकाये खलु जीवानाम् आगमनगमनभाषोन्मेषमनोयोगवचोयोग काय-योगाः, ये चान्यन्ते तथाप्रकाराश्चलाः भावाः सर्वे ते धर्मास्तिकाये प्रवर्तन्ते, गति लक्षणः खलु धर्मास्तिकायः। अधर्मास्तिकायः खलु जीवानां किं प्रवर्तते? गौतम! अधर्मास्तिकाये खलु जीवानां स्थाननिषदनत्वग्वर्तनं मनसश्च एकत्वीभावकरणता, ये चान्यन्ये स्थिरा भावाः सर्वे ते अधर्मास्तिकाये प्रवर्तन्ते, स्थानलक्षणः खलु अधर्मास्तिकायः। आकाशास्तिकायः खलु भदन्त! जीवानाम् अजीवानां च किं प्रवर्तते? गौतम! आकाशास्तिकाये खलु जीवद्रव्याणां च अजीवद्रव्याणां च भाजनभूते, एकेनापि पूर्णे तस्मिन् द्वाभ्यामपि पूर्णे शतमपि मायात्, कोटिशते-नापि पूर्णे कोटिसहस्रमपि मायात्॥१॥ अवगाहनालक्षणः खलु आकाशास्ति

कायः । जीवास्तिकायः खलु भदन्त ! जीवानां किं प्रवर्तते ? गौतम ! जीवास्तिकाये खलु जीवः अनन्तानाम् आभिनिबोधिकज्ञानपर्यवाणाम्, अनन्तानां श्रुतज्ञानपर्यवाणाम्, एवं यथा द्वितीयशतके अस्तिकायोद्देशके यावत् उपयोगं गच्छति' उपयोगलक्षणः खलु जीवः । पुद्गलास्तिकायः खलु पृच्छा, गौतम ! पुद्गलास्तिकाये खलु जीवानम् औदारिकवैक्रियाहारकतैजसकार्मणश्रोत्रेन्द्रियचक्षुरिन्द्रियघ्राणेन्द्रियजिह्वेन्द्रियस्पर्शेन्द्रियमनोयोगवचोयोगकाययोगानप्राणानां च ग्रहणं प्रवर्तते, ग्रहणलक्षणः खलु पुद्गलास्तिकायः ॥ सू० ७ ॥

टीका—अथ सप्तमं प्रवर्त्तनद्वारमाह–' किमियं भंते ! ' इत्यादि । ' किमयं भंते ! लोएत्ति पवुच्चइ ? ' गौतमः पृच्छति–हे भदन्त ! किम् अयं लोक इति प्रोच्यते, कस्तावत् लोकशब्दार्थः ? भगवानाह–' गोयमा ! पंचत्थिकाया, एसणं एवइए लोए त्ति पवुच्चइ' हे गौतम ! पञ्च अस्तिकायाः, एष खलु पञ्चास्तिकायसमूहः एतावत्को लोक इति प्रोच्यते, पञ्चास्तिकायरूपो लोक शब्दार्थ इति भावः । तान् पञ्चास्तिकायान् प्रदर्शयति–' तं जहा–धम्मत्थिकाए, अहम्मत्थिकाए जाव

प्रवर्त्तनद्वारवक्तव्यता—

'किमयं भंते ! लोएत्ति पवुच्चइ' इत्यादि ।

टीकार्थ–सूत्रकार ने इस सूत्रद्वारा सातवें प्रवर्त्तन द्वार का कथन किया है। इसमें गौतम ने प्रभु से ऐसा पूछा है–'किमयं भंते ! लोएत्ति-पवुच्चइ' हे भदन्त ! लोक शब्द का वाच्यार्थ क्या है ? इसके उत्तर में प्रभु कहते हैं–'गोयमा' हे गौतम ! 'पंचत्थिकाया, एस णं एवइए लोए त्ति पवुच्चइ' पंचास्तिकायरूप लोक शब्दका वाच्यार्थ है । अर्थात् पांच जो अस्तिकाय है–वे ही लोक रूप हैं । 'तं जहा' वे अस्तिकाय इस

—પ્રવર્ત્તનદ્વારવક્તવ્યતા—

" किमयं भंते ! लोएत्ति पवुच्चइ " ઇત્યાદિ—

ટીકાર્થ–સૂત્રકારે આ સૂત્રમાં સાતમાં પ્રવર્ત્તન દ્વારનું કથન કર્યું છે. આ વિષયને અનુલક્ષીને ગૌતમ સ્વામી મહાવીર પ્રભુને એવો પ્રશ્ન પૂછે છે કે–" किमयं भंते ! लोए त्ति पवुच्चइ ?" હે ભગવન્ ! લોક શબ્દનો વાચ્યાર્થ શો છે ?

મહાવીર પ્રભુનો ઉત્તર–" गोयमा ! " હે ગૌતમ ! " पंचत्थिकाया एस णं एवइए लोए त्ति पवुच्चइ " આ લોક પંચાસ્તિકાય રૂપ છે. એટલે કે જે પાંચ અસ્તિકાય છે, તેઓ જ લોકરૂપ છે. " तंजहा " તે પાંચ અસ્તિકાયો નીચે પ્રમાણે છે–" धम्मत्थिकाए, अहम्मत्थिकाए, जाव पोग्गलत्थिकाए " (૧) ધર્મા-

पोग्गलत्थिकाए ' तद्यथा–धर्मास्तिकायः, अधर्मास्तिकायः, यावत्–आकाशास्ति-कायः, जीवास्तिकायः, पुद्गलास्तिकायः । गौतमः पृच्छति–' धम्मत्थिकाए णं भंते ! जीवाणं किं पवत्तइ ?' हे भदन्त ! धर्मास्तिकायः खलु जीवानां किं–कथं प्रवर्तते ? धर्मास्तिकायेन जीवानां कीदृशी प्रवृत्तिर्भवति ? इति प्रश्नः । भगवानाह–'गोयमा ! धम्मत्थिकाए णं जीवाणं आगमणगमणभासुम्मेसमणजोगा वइजोगा कायजोगा, जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पवत्तंति' हे गौतम ! धर्मास्तिकाये सति खलु जीवानाम् आगमनगमनभाषोन्मेषमनोयोग-वचोयोगकायजोगाः, तत्र आगमनगमने प्रसिद्धे, भाषा–व्यक्तवचनम् , उन्मेषः नयनस्पन्दनात्मकव्यापारविशेषः, मनोयोगवाग्योगकाययोगाः प्रसिद्धा एव,

---

प्रकार से हैं–'धम्मत्थिकाए, अहम्मत्थिकाए, जाव पोग्गलत्थिकाए) धर्मा-स्तिकाय, अधर्मास्तिकाय यावत्–आकाशास्तिकाय, जीवास्तिकाय और पुद्गलास्तिकाय । अब गौतमस्वामी प्रभु से ऐसा पूछते हैं–'धम्मत्थिकाए णं भंते ! जीवा णं किं पव्वत्तइ' हे भदन्त ! धर्मास्तिकाय के सहारे के जीवों की प्रवृत्ति कैसी होती है ? इसके उत्तर में प्रभु कहते हैं–'गोयमा ! धम्म-त्थिकाए णं जीवाणं आगमण–गमण-भासुम्मेसमणजोगा, वइजोगा, काय-जोगा जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पव-त्तंति' हे गौतम ! धर्मास्तिकाय के होने पर ही जीवों का आना जाना–गमनागमन होता है अर्थात्–चलना फिरना होता है । कहीं से आना और कहीं पर जाना ऐसा जो आनेजानेरूप कार्य होता है वह धर्मास्ति-काय के सद्भाव में ही होता है। इसी प्रकार से भाषा–व्यक्तवचन, उन्मेष नेत्र का उघाडना, .मनोयोग, वाग्योग, काययोग तथा इसी

स्तिकाय, (२) अधर्मास्तिकाय, (३) आकाशास्तिकाय, (४) जीवास्तिकाय अने (५) पुद्गलास्तिकाय.

ગૌતમ સ્વામીનો પ્રશ્ન–" धम्मत्थिकाए णं भंते ! जीवाणं किं पव्वत्तइ" હે ભગવન્ ! ધર્માસ્તિકાય જીવોની પ્રવૃત્તિમાં કેવી રીતે મદદ રૂપ બને છે ?

મહાવીર પ્રભુનો ઉત્તર–" गोयमा ! धम्मत्थिकाए णं जीवाणं आगमणगमण–भासुम्मेसमणजोगा, वइजोगा, कायजोगा, जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पवत्तंति " હે ગૌતમ ! ધર્માસ્તિકાયના અસ્તિત્વને લીધે જ જીવો ગમનાગમન (અવરજવર) કરી શકે છે. કોઈ જગ્યાએથી આવવાનું અને કોઇ જગ્યાએ જવાનું કાર્ય ધર્માસ્તિકાયનો સદ્ભાવ હોય તો જ થઇ શકે છે. એજ પ્રમાણે ભાષા (વચન બોલવાની ક્રિયા), ઉન્મેષ (નેત્ર ઉઘાડવાની ક્રિયા), મનોયોગ, વાગ્યોગ, કાયયોગ તથા એજ પ્રકારની બીજી પણ જે

अत्र च मनोयोगादयः सामान्यरूपाः, आगमनादयस्तु तद्विशेषरूपा भवन्ति, अतस्तेषां भेदेनोपादानं कृतम्, एवं ये चान्यान्ये-आगमनादिभ्योऽपरे तथा प्रकाराः-आगमनादिसदृशाः भ्रमणचलनादयश्चला भावाश्चलस्वभावा पर्यायाः सन्ति, सर्वे ते धर्मास्तिकाये सति भवर्तन्ते, तत्र हेतुमाह-'गइलक्खणे णं धम्मत्थिकाए' यतो गतिलक्षणः-गतिलक्षणं यस्य स तथाविधः खलु धर्मास्तिकायो भवति, धर्मास्तिकायस्य गतिस्वभावत्वादिति भावः। गौतमः पृच्छति-'अहम्मत्थिकाए णं जीवाणं किं पवत्तइ ?' हे भदन्त ! अधर्मास्तिकायः खलु जीवानां किं कथं प्रवर्तते ? अधर्मास्तिकायेन जीवानां कीदृशी प्रवृत्तिर्भवति ? इति प्रश्नः। भगवानाह-'गोयमा ! अहम्मत्थिकाए णं जीवाणं ठाणनिसीयणतुयट्टणमणस्स य एगत्तीभावकरणया, जे यावन्ने तहप्पगारा थिरा भावा सव्वे ते अहम्मत्थिकाए पवत्तंति' हे गौतम ! अधर्मास्तिकाये सति खलु, अधर्मास्तिकायेनेत्यर्थः जीवानां स्थान निषदनत्वग्वर्तनं कायोत्सर्गशयनानि, तत्र स्थानं स्थितिः, निषदनम्-उपवेशनम्, त्वग्वर्तनं-पार्श्वपरिवर्तनस्य स्थिरीकरणम्, मनसश्च एकत्वीभावकरणता-

---

प्रकार जो और भी चलस्वभावरूप भ्रमण-चलन आदि पर्याये हैं वे सब भी धर्मास्तिकाय के होने पर ही होते हैं। इसमें हेतु यह है-'गइलक्खणे णं धम्मत्थिकाए' धर्मास्तिकाय का स्वभाव गतिरूप है। अब गौतमस्वामीप्रभु से ऐसा पूछते हैं-'अहम्मत्थिकाएणं जीवाणं किं पवत्तइ' हे भदन्त ! अधर्मास्तिकाय के सहारे से जीवों की प्रवृत्ति कैसी होती है ? इसके उत्तर में प्रभु कहते हैं-'गोयमा ! अहम्मत्थिकाए णं जीवाणं ठाणनिसीयण तुयट्टणमणस्स य एगत्तीभावकरणया जे यावन्ने तहप्पगारा थिरा भावा सव्वे ते अहम्मत्थिकाए पवत्तंति' हे गौतम ! अधर्मास्तिकाय के होने पर ही खडे रहनेरूप, बैठनेरूप, करवट नहीं बदलनेरूप, मनको एकीभाव करनेरूप कार्य होते है, तथा इन स्थान निष-

---

ચલસ્વભાવરૂપ ભ્રમણ આદિ પર્યાયો છે, તે સઘળી ક્રિયાઓ પણ ધર્માસ્તિકાય હોય તો જ થઈ શકે છે. "गइलक्खणेणं धम्मत्थिकाए" ધર્માસ્તિકાયનો સ્વભાવ ગતિરૂપ છે-તેને લીધે જ ગતિ સંભવી શકે છે.

ગૌતમ સ્વામીનો પ્રશ્ન-"अहम्मत्थिकाए णं जीवाणं किं पवत्तइ ?" હે ભગવન્! અધર્માસ્તિકાયની મદદથી જીવો કેવી પ્રવૃત્તિ કરી શકે છે ?

મહાવીર પ્રભુનો ઉત્તર-"गोयमा ! अहम्मत्थिकाएणं जीवाण ठाणनिसीयण-तुयट्टणमणस्स य एगत्तीभावकरणया जे यावन्ने तहप्पगारा थिरा भावा, सव्वे ते अहम्मत्थिकाए प्रवर्त्तंति" હે ગૌતમ ! અધર્માસ્તિકાયનો સદ્ભાવ હોવાને કારણે જ ઊભા રહેવારૂપ, બેસવારૂપ, પડખું નહીં બદલવારૂપ, મનને એકાગ્ર

अनेकत्वस्य एकत्वस्य भवनमेकत्वीभावस्तस्य यत्करणं तद्भावस्तत्ता एकत्वीभावकरणता भवति, एवं ये चान्यन्ये स्थाननिषदनादिभ्यो भिन्नाः तथाप्रकाराः-स्थाननिषदनादिसदृशाः स्थिराः भावाः सन्ति, सर्वे ते अधर्मास्तिकाये सति प्रवर्तन्ते, तत्र हेतु माह-' ठाणलक्खणे णं अहम्मत्थिकाए ' यतः स्थानलक्षणः-स्थानं लक्षणं यस्य स तथाविधः खलु अधर्मास्तिकायो भवति, अधर्मास्तिकायस्य स्थितिस्वभावत्वादिति भावः। गौतमः पृच्छति-' आगासत्थिकाए णं भंते ! जीवाणं अजीवाणय किं पवत्तइ ? ' हे भदन्त ! आकाशास्तिकायः खलु-जीवानाम् अजीवानां च किं कथं प्रवर्तते ? आकाशास्तिकायेन जीवानां कीदृशी प्रवृत्तिर्भवति ? इति प्रश्नः। भगवानाह-'गोयमा ! आगासत्थिकाए णं जीवदव्वाण य अजीवदव्वाणय भायणभूए-एगेण वि से पुन्ने, दोहिं वि पुन्ने सयं पि माएज्जा कोडिसएण वि पुन्ने कोडिसहस्सं पि माएज्जा ॥ १ ॥

दन आदि से भिन्न और भी इन्हीं जैसे स्थिर भाव धर्मास्तिकाय के सद्भाव में ही संपादित होते हैं क्योंकि 'ठाणलक्खणे णं अहम्मत्थिकाए' स्थानलक्षणवाला यह अधर्मास्थिकाय कहा गया है। अब गौतमस्वामी प्रभु से ऐसा पूछते हैं-'आगासत्थिकाए णं भंते ! जीवाणं अजीवाण य किं पवत्तइ' हे भदन्त ! आकाशास्तिकाय से जीवों और अजीवों की प्रवृत्ति कैसी होती है ?-अर्थात् आकाशास्तिकाय में जीव और अजीव अपनी कैसी प्रवृत्ति करते हैं ? इसके उत्तर में प्रभु कहते हैं-(गोयमा) 'आगासत्थिकाए णं जीवदव्वाण य अजीवदव्वाण य भायणभूए' हे गौतम ! आकाशास्तिकाय जीव द्रव्यों का और अजीवद्रव्यों का भाजनभूत होता है, ' एगेण वि से पुन्ने दोहिं वि पुन्ने सयंपि माएज्जा, कोडिसएण वि पुन्ने कोडिसहस्सं पि माएज्जा' क्योंकि जीवा-

---

કરવા રૂપ, તથા એવા પ્રકારના બીજા પણ સ્થિર ભાવો અધર્માસ્તિકાયના સદ્ભાવને લીધે જ સંભવી શકે છે, કારણ કે " ठाणलक्खणे णं अहम्मत्थिकाए " આ અધર્માસ્તિકાયને સ્થાન (સ્થિતિ) લક્ષણવાળું કહ્યું છે.

ગૌતમ સ્વામીનો પ્રશ્ન-" आगासत्थिकाएणं भंते ! जीवाणं अजीवाण य किं पवत्तइ ?" હે ભગવન્ ! આકાશાસ્તિકાય જીવો અને અજીવોની પ્રવૃત્તિમાં કેવી રીતે મદદરૂપ બને છે ?

મહાવીર પ્રભુનો ઉત્તર-" आगासत्थिकाए णं जीवदव्वाण य अजीव दव्वाण य भायणभूए " હે ગૌતમ ! આકાશાસ્તિકાય જીવદ્રવ્યો તથા અજીવદ્રવ્યોના ભાજન (આશ્રયસ્થાન) રૂપ બને છે. " एगेण वि से पुन्ने, दोहि वि पुन्ने सयंपि माएज्जे, कोडिसएण वि पुन्ने कोडिसहस्संपि माएज्जा " કારણ કે જીવાદિક

हे गौतम ! आकाशास्तिकायः खलु जीवद्रव्याणां च, अजीवद्रव्याणां च भाजनभूतो भवति, तथा च एतस्मिन् आकाशास्तिकाये सति जीवादीनामवगाहः प्रवर्तते, तस्य जीवादिभाजनभूतत्वं प्रदर्शयति 'एगेण वि से' इत्यादि, एकेनापि परमाण्वादिना सः असौ आकाशास्तिकायप्रदेशः पूर्णो भृतः तथा द्वाभ्यामपि ताभ्यां परमाणुभ्यां पूर्णः स आकाशास्तिकायप्रदेशो भवति, तत्र आकाशास्तिकाये एकद्विपरमाण्वादिभिः पूर्णे शतमपि मायात्-समाविशेत्, तथा कोटिशतेनापि पूर्णो भवति, तत्र कोटिसहस्रमपि मायात्-समाविशेत् ॥१॥ एवं च यथाऽपवरकाकाशमेकप्रदीप प्रभापटलेनापि पूर्यते तत्र द्वितीयमपि प्रदीपप्रभापटलं माति, यावच्छतमपिप्रभापटलं तत्र माति, तथा औषधिविशेषापादितपरिणामादेकत्र पारदकर्षे 'तोला' इति प्रसिद्धे सुवर्णकर्षशतं प्रविशति, पारदकर्षीभूतं च तद्भवति औषधिसामर्थ्यात्, पुनः पारदस्य कर्षः सुवर्णस्य च कर्षशतं भवति, पुद्गलपरिणा-

---

दिक द्रव्यों को अवगाह देने का इसका स्वभाव है। एक भी पुद्गलपरमाणु आदि जिस आकाश के एक प्रदेश में अवगाहित होता है, आकाश के उसी एकप्रदेश में दो भी पुद्गलपरमाणु अवगाहित हो जाते हैं और सौ भी पुद्गलपरमाणु अवगाहित हो जाते हैं। तथा उसी एकप्रदेश में कोटिशत और कोटिसहस्र भी पुद्गलपरमाणु समा जाते हैं। जैसे कोठरी के आकाश में एक दीपक की प्रभा भी समा जाती है, दो दीपकों की प्रभा भी समा जाती है, सौ दीपकों की प्रभा भी समा जाती हैं। तथा औषधिविशेष से आपादित परिणाम के प्रभाव से एक तोला पारेमें सौ तोला सोना प्रविष्ट हो जाता है अर्थात् समा जाता है और वह सोना पारे के वजन में आ जाता है तथा वापिस पृथक्करने पर औषधि के सामर्थ्य से पारा एक तोला और सोना १०० सौ तोला हो जाता है। पुद्गलपरिणाम की कुछ ऐसी ही

દ્રવ્યોને અવગાહ દેવાનો તેનો સ્વભાવ છે. આકાશના જે એક પ્રદેશમાં એક જ પરમાણુ આદિ અવગાહિત થાય છે (રહે છે), એજ આકાશના એક પ્રદેશમાં બે પુદ્ગલપરમાણુ પણ અવગાહિત થઈ જાય છે, સો પુદ્ગલપરમાણુ પણ અવગાહિત થઈ જાય છે, તથા તે એક જ પ્રદેશમાં કોટિશત અને કોટિ-સહસ્ર પુદ્ગલપરમાણુ પણ સમાઈ જાય છે. જેવી રીતે ઓરડાના આકાશમાં (અવકાશમાં) એક દીપકનો પ્રકાશ પણ સમાઈ જાય છે, બે દીપકનો પ્રકાશ પણ સમાઈ જાય છે અને સો દીપકનો પ્રકાશ પણ સમાઈ જાય છે, તથા ઔષધિવિશેષ દ્વારા સંપાદિત પરિણામના પ્રભાવથી એક તોલા પારામાં સો તોલા સોનાનો સમાવેશ થઈ જાય છે અને તે સોનું પારાના વજનમાં આવી જાય છે તથા પારાનું વજન પણ ઔષધિના પ્રભાવથી ૧૦૦ તોલા બરાબર

मस्य विचित्रत्वात्, तत्र हेतुमाह-'अवगाहणालक्खणे णं आगासत्थिकाए' अवगाहनालक्षणः-अवगाहना-समावेशरूपम् आश्रयभावो लक्षणं स्वरूपम् स्वभावो वा यस्य स तथाविधः खलु आकाशास्तिकायो भवति आकाशास्तिकायस्य अवगाहना स्वभावत्वादिति भावः। गौतमः पृच्छति-'जीवत्थिकाये णं भंते! जीवाणं किं पवत्तइ?' हे भदन्त! जीवास्तिकायः खलु जीवानां किं-कथं प्रवर्तते? जीवास्तिकायेन जीवतया जीवानां कीदृशी प्रवृत्तिर्भवति? इति प्रश्नः, भगवानाह-'गोयमा! जीवत्थिकाये णं जीवे अणंताणं आभिणिबोहियनाणपज्जवाणं, अणंताणं सुयनाणपज्जवाणं, एवं जहा बितियसए अत्थिकायउद्देसए जाव उवओगं गच्छइ' हे गौतम! जीवास्तिकाये सति खलु जीवः अनन्तानम् अभिनिबोधिकज्ञानपर्यवाणाम् मतिज्ञानपर्यायाणाम् अनन्तानां श्रुतज्ञानपर्यवाणाम्, एवं रीत्या,

---

विचित्रता है। 'अवगाहनालक्खणे णं आगासत्थिकाए' ऐसा क्यों होता है तो इसका उत्तर यही है कि अवगाहनालक्षणवाला यह आकाश है। अर्थात् आकाशास्तिकाय का ऐसा ही स्वभाव है कि वह जीवादिक द्रव्यों को अपने में ठहरने के लिये स्थान-जगह देता है। अब गौतम-स्वामी प्रभु से ऐसा पूछते हैं-'जीवत्थिकाए णं भंते! जीवाणं किं पवत्तइ' हे भदन्त! जीवास्तिकाय से जीवों की कैसी प्रवृत्ति होती है? इसके उत्तर में प्रभु कहते हैं-'गोयमा! जीवत्थिकाए णं जीवे अणंताणं आभिणिबोहियनाणपज्जवाणं, अणंताणं सुयनाणपज्जवाणं एवं जहा बितियसए अत्थिकायउद्देसए जाव उवओगं गच्छइ' हे गौतम! जीवास्तिकाय के होने पर जीव अनन्तमतिज्ञान की पर्यायों के अनन्तश्रुत-

---

થઈ જાય છે, એજ પ્રકારે પુદ્ગલપરિણામની પણ કોઈ એવી જ વિચિત્રતા છે એવું કેમ બને છે? આ પ્રશ્નનો ઉત્તર એ છે કે "अवगाहनालक्खणेणं आगासत्थिकाए" આ આકાશ અવગાહનાલક્ષણવાળું છે. એટલે કે આકાશાસ્તિકાયનો સ્વભાવ જ એવો છે કે તે જીવાદિક દ્રવ્યોને પોતાની અંદર રહેવા માટે સ્થાન આપે છે.

ગૌતમ સ્વામીનો પ્રશ્ન-"जीवत्थिकाए णं भंते! जीवाणं किं पवत्तइ?" હે ભગવન્! જીવાસ્તિકાય જીવોની પ્રવૃત્તિમાં કેવી રીતે મદદરૂપ બને છે?

મહાવીર પ્રભુનો ઉત્તર-"गोयमा! जीवत्थिकाए णं जीवे अणंताणं आभिणिबोहियनाणपज्जवाणं, अणंताणं सुयनाणपज्जवाणं एवं जहा बितियसए अत्थिकायउद्देसए जाव उवओगं गच्छइ" હે ગૌતમ! જીવાસ્તિકાયના સદ્ભાવમાં જ જીવો અનંત મતિજ્ઞાનની પર્યાયોના, અનંત શ્રુતજ્ઞાનની પર્યાયોના,

यथा द्वितीयशतके अस्तिकायोद्देशके-दशमोद्देशके यावत्-अवध्यादि ज्ञानपर्यवाणाम् ज्ञानदर्शनयोः उपयोगं गच्छति-प्राप्नोति, तत्र हेतुमाह-'उवओगलक्खणे णं जीवे' यतः उपयोगलक्षणः-उपयोगः लक्षणं स्वरूपं यस्य स तथाविधः खलु जीवो भवति, जीवास्तिकायस्य उपयोग स्वभावत्वादिति भावः। गौतमः पृच्छति-'पोग्गलत्थिकाए णं पुच्छा' हे भदन्त ! पुद्गलास्तिकायः खलु जीवानां किं-कथं प्रवर्तते ? पुद्गलास्तिकायेन जीवानां कीदृशी प्रवृत्तिर्भवति ? इति प्रश्नः, भगवानाह-'गोयमा ! पोग्गलत्थिकाए णं जीवाणं ओरालियवेउव्विया आहारए तेया कम्मए सोइंदियचक्खिंदियघाणिंदिय जिब्भिंदियफासिंदिय मणजोगवयजोगकायजोगआणापाणूणं च गहणं पवत्तइ' हे गौतम ! पुद्गलास्तिकाये सति खलु पुद्गलास्तिकायेनेत्यर्थः जीवानाम् औदारिकवैक्रियाहारकतैजसकार्मणश्रोत्रेन्द्रिय

ज्ञान की पर्यायों के इस रीति से द्वितीयशतक में अस्तिकाय उद्देशक में वर्णितपद्धति के अनुसार यावत् अवधिज्ञान आदि ज्ञानों की पर्यायों के, ज्ञानदर्शन के उपयोग को प्राप्त करता है। क्योंकि 'उवओगलक्खणे णं जीवे' उपयोग है लक्षण जिसका ऐसा यह जीवास्तिकाय है। अर्थात् उपयोग स्वभाववाला जीवास्तिकाय कहा गया है। अब गौतम स्वामी प्रभु से ऐसा पूछते हैं-'पोग्गलत्थिकाए णं पुच्छा' हे भदन्त ! पुद्गलास्तिकाय से जीवों की प्रवृत्ति कैसी होती है ? इसके उत्तर में प्रभु कहते हैं-'गोयमा ! पोग्गलत्थिकाए णं जीवाणं ओरालिय वेउव्विय आहारए तेयाकम्मए, सोइंदिय, चक्खिंदिय, घाणिंदिय, जिब्भिंदिय, फासिंदिय, मणजोग वयजोगकायजोग आणापाणूणं च गहणं पवत्तइ' हे गौतम ! पुद्गलास्तिकाय के होने पर जीवों के औदारिक, वैक्रिय,

---

તથા બીજા શતકના અસ્તિકાય ઉદ્દેશકમાં વર્ણવેલી અવધિજ્ઞાન આદિ જ્ઞાનોની પર્યાયોના, જ્ઞાનદર્શનના ઉપયોગને પ્રાપ્ત કરે છે કારણ કે "उवओगलक्खणे णं जीवे" આ જીવાસ્તિકાય ઉપયોગલક્ષણવાળું છે. એટલે કે જીવાસ્તિકાયને ઉપયોગ સ્વભાવવાળું કહ્યું છે.

ગૌતમ સ્વામીનો પ્રશ્ન-"पोग्गलत्थिकाए णं पुच्छा" હે ભગવન્! પુદ્ગલાસ્તિકાય જીવોની પ્રવૃત્તિમાં કેવી રીતે મદદરૂપ બને છે?

મહાવીર પ્રભુનો ઉત્તર-"गोयमा ! पोग्गलत्थिकाए णं जीवाणं ओरालिय-वेउव्विय आहारए तेयाकम्मए, सोइंदिय, चक्खिंदिय, घाणिंदिय, जिब्भिंदिय, फासिंदिय, मणजोग, वयजोगकायजोग आणापाणूणं च गहणं पवत्तइ" હે ગૌતમ ! પુદ્ગલાસ્તિકાયનો સદ્ભાવ હોવાને લીધે જ જીવો औદારિક, વૈક્રિય,

चक्षुरिन्द्रियघ्राणेन्द्रियजिह्वेन्द्रियस्पर्शनेन्द्रियमनोयोगवचोयोगकाययोगानप्राणानां च ग्रहणं प्रवर्तते, तत्र हेतुमाह–'गहणलक्खणेणं पोग्गलत्थिकाए' ग्रहणलक्षणः ग्रहणम्–आदानं लक्षणं–स्वरूपं यस्य स तथाविधः खलु पुद्गलास्तिकायो भवति, पुद्गलास्तिकायस्य औदारिकादिग्रहणस्वभावत्वात्। औदारिकादीनां च पुद्गलमयत्वादिति भावः ॥सू० ७॥

एकास्तिकाय प्रदेशस्पर्शनाद्वारवक्तव्यता

मूलम्–"एगे भंते! धम्मत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे? गोयमा! जहन्नपए तिहिं उक्कोसपए छहिं। केवइएहिं अहम्मत्थिकायपएसेहिं पुट्ठे? गोयमा! जहन्नपए चउहिं उक्कोसपए सत्तहिं। केवइएहिं आगासत्थिकायपएसेहिं पुट्ठे? गोयमा! सत्तहिं। केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे? गोयमा! अणंतेहिं। केवइएहिं पोग्गलत्थिकायपएसेहिं पुट्ठे? गोयमा! अणंतेहिं। केवइएहिं अद्धासमएहिं पुट्ठे? सिय पुट्ठे, सिय नो पुट्ठे, जइ पुट्ठे नियमं अणंतेहिं॥ एगे भंते! अहम्मत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे? गोयमा! जहन्नपए चउहिं, उक्कोसपए सत्तहिं। केवइएहिं अहम्मत्थिकायपएसेहिं पुट्ठे? जह-

---

आहारक, तैजस कार्मण इनके ग्रहणमें, तथा श्रोत्रेन्द्रिय, चक्षुइंद्रिय, घ्राणेन्द्रिय, जिह्वेन्द्रिय, स्पर्शनेन्द्रिय, मनोयोग, वचोयोग, काययोग श्वासोच्छ्वास इनके ग्रहणमें प्रवृत्ति होती है क्योंकि–'गहणलक्खणेणं पोग्गलत्थिकाए' पुद्गलास्तिकाय का स्वभाव ग्रहण करने का है–अर्थात् पुद्गलास्तिकाय द्वारा जीव औदारिक आदि पुद्गलों को ग्रहण करता है ये औदारिक आदि पुद्गलमय हैं ॥ ७ ॥

इति प्रवर्त्तनद्वारवक्तव्यता ॥

આહારક, તૈજસ અને કાર્મણના ગ્રહણમાં તથા શ્રોત્રેન્દ્રિય, નેત્રેન્દ્રિય, ઘ્રાણેન્દ્રિય, રસનેન્દ્રિય, સ્પર્શેન્દ્રિય, મનોયોગ, વચનયોગ અને કાયયોગના ગ્રહણમાં પ્રવૃત્ત થાય છે, કારણ કે "गहणलक्खणेणं पोग्गलत्थिकाए" પુદ્ગલાસ્તિકાયનો સ્વભાવ ગ્રહણ કરવાનો છે. એટલે કે ઔદારિક આદિને ગ્રહણ કરવાનો પુદ્ગલાસ્તિકાયનો સ્વભાવ છે તે ઔદારિક આદિ પુદ્ગલમય છે. ॥સૂ૦૭॥

॥ પ્રવર્ત્તનદ્વાર વક્તવ્યતા સંપૂર્ણ ॥

ज्झपए तिहिं, उक्कोसपए छहिं, सेसं जहा धम्मत्थिकायस्स॥ एगे भंते! आगासत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे? गोयमा! सिय पुट्ठे, सिय नो पुट्ठे, जइ पुट्ठे जहन्नपए एक्केण वा, दोहिं वा, तीहिं वा, चउहिं वा, उक्कोसपए सत्तहिं, एवं अहम्मत्थिकायप्पएसेहि वि। केवइएहिं आगासत्थिकाय-पएसेहिं पुट्ठे? छहिं, केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे, सिय पुट्ठे, सिय नो पुट्ठे, जइ पुट्ठे नियमं अणंतेहिं। एवं पोग्गलत्थि-कायपएसेहि वि। अद्धासमएहि वि। एगे भंते! जीवत्थिकाय-पएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे? पुच्छा, जहन्नपए चउहिं उक्कोसपए सत्तहिं। एवं अहम्मत्थिकायपएसेहि वि, केवइएहिं आगासत्थिकायपएसेहिं पुट्ठे? सत्तहिं। केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे? सेसं जहा धम्मत्थिकायस्स। एगे भंते! पोग्गलत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे? एवं जहेव जीवत्थिकायस्स॥सू० ८॥

छाया—एको भदन्त! धर्मास्तिकायप्रदेशः कियद्भिः धर्मास्तिकायप्रदेशैः स्पृष्टः? गौतम! जघन्यपदे त्रिभिः, उत्कृष्टपदे षड्भिः, कियद्भिः अधर्मास्ति-कायप्रदेशैः स्पृष्टः? गौतम! जघन्यपदे चतुर्भिः, उत्कृष्टपदे सप्तभिः। कियद्भिः आकाशास्तिकायप्रदेशैः स्पृष्टः? गौतम सप्तभिः। कियद्भिः जीवास्तिकायप्रदेशैः स्पृष्टः? गौतम! अनन्तैः। कियद्भिः पुद्गलास्तिकायप्रदेशैः स्पृष्टः? गौतम! अनन्तैः। कियद्भिः अद्धासमयैः स्पृष्टः? स्यात् स्पृष्टः, स्यात् नो स्पृष्टः, यदा स्पृष्टो नियमात् अनन्तैः। एको भदन्त! अधर्मास्तिकायप्रदेशः कियद्भिः धर्मा-स्तिकायप्रदेशैः स्पृष्टः? गौतम! जघन्यपदे चतुर्भिः, उत्कृष्टपदे सप्तभिः। कियद्भिः अधर्मास्तिकायप्रदेशैः स्पृष्टः? जघन्यपदे त्रिभिः, उत्कृष्टपदे षड्भिः, शेषं यथा धर्मास्तिकायस्य॥ एको भदन्त! आकाशास्तिकायप्रदेशः कियद्भिः धर्मास्तिकायप्रदेशैः स्पृष्टः? गौतम! स्यात् स्पृष्टः, स्यात् नो स्पृष्टः, यदा स्पृष्टो जघन्यपदे एकेन वा, द्वाभ्यां वा, त्रिभिर्वा, चतुर्भिर्वा, उत्कृष्टपदे सप्तभिः, एवम् अधर्मास्तिकायप्रदेशैरपि। कियद्भिः आकाशास्तिकायप्रदेशैः स्पृष्टः? षड्भिः कियद्भिः जीवास्तिकायप्रदेशैः स्पृष्टः? स्यात् स्पृष्टः, स्यात् नो स्पृष्टः, यदा

स्पृष्टो नियमात् अनन्तैः, एवं पुद्गलास्तिकायप्रदेशैरपि, अद्धासमयैरपि, एको भदन्त ! जीवास्तिकायप्रदेशः कियद्भिः धर्मास्तिकायप्रदेशैः स्पृष्टः ? पृच्छा, जघन्यपदे चतुर्भिः, उत्कृष्टपदे सप्तभिः, एवम् अधर्मास्तिकाय प्रदेशैरपि, कियद्भिः आकाशास्तिकाय प्रदेशैः स्पृष्टः ? सप्तभिः, कियद्भिः जीवास्तिकायप्रदेशैः स्पृष्टः ? शेषं यथा धर्मास्तिकायस्य, एको भदन्त ! पुद्गलास्तिकायप्रदेशः कियद्भिः धर्मास्तिकायप्रदेशैः स्पृष्टः ? एवं यथैव जीवास्तिकायस्य ॥ सू० ८ ॥

टीका—अथ अष्टमम् आकाशास्तिकायादिप्रदेशद्वारमाह—'एगे भंते' इत्यादि। 'एगे भंते ! धम्मत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे?' गौतमः पृच्छति—हे भदन्त ! एको धर्मास्तिकायप्रदेशः कियद्भिः धर्मास्तिकाय-प्रदेशैः स्पृष्टो भवति ? भगवानाह—'गोयमा ! जहन्नपए तिहिं, उक्कोसपए छहिं'

एकास्तिकायप्रदेश स्पर्शद्वारवक्तव्यता—

'एगे भंते ! धम्मत्थिकायपएसे' इत्यादि।

टीकार्थ—इस सूत्रद्वारा सूत्रकार ने आठवें आकाशास्तिकायादि-प्रदेशद्वार का निरूपण किया है-इसमें गौतमने प्रभु से ऐसा पूछा है—'एगे भंते ! धम्मत्थिकायपएसे केवइएहिं धम्मत्थिकायपएसेहिं पुट्ठे' हे भदन्त ! धर्मास्तिकाय का एकप्रदेश धर्मास्तिकाय के कितने प्रदेशों द्वारा स्पृष्ट होता है ? पूछने का अभिप्राय ऐसा है कि धर्मास्तिकाय में असंख्यात प्रदेश कहे गये हैं-सो उसका एकप्रदेश उसके ही कितने प्रदेशों द्वारा

—એકાસ્તિકાયપ્રદેશ સ્પર્શદ્વાર વક્તવ્યતા—

" एगे भंते ! धम्मत्थिकायपएसे " ઇત્યાદિ—

ટીકાર્થ—સૂત્રકારે આ સૂત્રમાં આઠમાં આકાશાસ્તિકાયાદિ પ્રદેશદ્વારનું નિરૂપણ કર્યું છે. આ વિષયને અનુલક્ષીને ગૌતમ સ્વામી મહાવીર પ્રભુને એવો પ્રશ્ન પૂછે છે કે—" एगे भंते ! धम्मत्थिकायपएसे केवइएहिं धम्मत्थिकाय-पएसेहिं पुट्ठे ?" હે ભગવન્ ! ધર્માસ્તિકાયનો એક પ્રદેશ ધર્માસ્તિકાયના કેટલા પ્રદેશો વડે સ્પૃષ્ટ થાય છે ? આ પ્રશ્નનો ભાવાર્થ એ છે કે ધર્માસ્તિ-કાયમાં અસંખ્યાત પ્રદેશ કહ્યા છે. અહીં એવો પ્રશ્ન પૂછાયો છે કે ધર્માસ્તિ-કાયનો એક પ્રદેશ તેના જ કેટલા પ્રદેશો દ્વારા સ્પૃષ્ટ થયેલો હોય છે ?

हे गौतम ! जघन्यपदे-जघन्येन त्रिभिः धर्मास्तिकाय प्रदेशैः, उत्कृष्टपदे-उत्कृष्टेन षड्भिः धर्मास्तिकायप्रदेशैः एको धर्मास्तिकायप्रदेशः स्पृष्टो भवति, अत्र जघन्यपदेन लोकान्तक्षोणो विवक्षितः, यत्र एकस्य धर्मास्तिकायप्रदेशस्य अतिस्तोकैरन्यैः स्पर्शना भवति। स च भूम्यासन्नापवरकक्षोणदेशसदृशो बोध्यः, तत्र उपरितनेन एकेन, द्वाभ्यां च पार्श्वतः इत्येवं धर्मास्तिकायस्य त्रिभिः प्रदेशैः विवक्षितप्रदेशस्य स्पर्शना भवति। उत्कृष्टपदेन चतुर्दिशां चत्वारः प्रदेशाः, ऊर्ध्वाधोदिशोश्च द्वौ प्रदेशौ, इत्येवं षड्भिः प्रदेशैः विवक्षितप्रदेशस्य स्पर्शना भवति ।१। गौतमः पृच्छति-' केवइएहिं अहम्मत्थिकायपएसेहिं पुट्ठे ? ' हे भदन्त ! एको धर्मास्ति-

---

छुआ गया होता है ? इसके उत्तर में प्रभु कहते हैं-'गोयमा ! जहन्नपए तिहिं, उक्कोसपए छहिं' हे गौतम ! जघन्यपद में वह एक धर्मास्तिकाय प्रदेश तीन धर्मास्तिकायप्रदेशों द्वारा स्पृष्ट होता है-यहां जघन्यपद से लोकान्तकोण विवक्षित है-यहां धर्मास्तिकाय का विवक्षित एक प्रदेश ऊपर के एक प्रदेश द्वारा और आसपास के दो प्रदेशों द्वारा स्पृष्ट होता है इस प्रकार अतिस्तोक अन्य प्रदेशों से उनकी स्पर्शना कही गई है। यह लोकान्तकोण भूमिके पास के कोठे के कोने के प्रदेश जैसा समझना चाहिये। उत्कृष्ट से वह विवक्षित धर्मास्तिकाय का एकप्रदेश अपनी चारों दिशाओं के धर्मास्तिकायप्रदेशों से और ऊपर नीचे के दो प्रदेशों से स्पृष्ट होता है-इस प्रकार चार दिशाओं के चार प्रदेशों से और ऊपर नीचे के दो प्रदेशों से उस विवक्षित प्रदेश की स्पर्शना कही गई है। अब गौतमप्रभु से ऐसा पूछते हैं-केवइएहिं-

---

મહાવીર પ્રભુનો ઉત્તર-" गोयमा ! जहन्नपए तिहिं, उक्कोसपए छहिं " હે ગૌતમ ! જઘન્યપદની અપેક્ષાએ તે એક ધર્માસ્તિકાય પ્રદેશ ત્રણ ધર્માસ્તિકાય પ્રદેશો દ્વારા સ્પૃષ્ટ થાય છે. અહીં જઘન્યપદ દ્વારા લોકાન્તકોણ ગ્રહણ કરવો જોઈએ ત્યાં ધર્માસ્તિકાયનો અમુક એક પ્રદેશ ઉપરના એક પ્રદેશ દ્વારા અને આસપાસના બે પ્રદેશો દ્વારા સ્પૃષ્ટ થાય છે. આ રીતે અતિસ્તોક અન્ય પ્રદેશો વડે તેની સ્પર્શના થવાનું કહેવામાં આવ્યું છે. આ લોકાન્તકોણ ભૂમિની પાસેના કોઠાના ખૂણાના પ્રદેશ જેવો સમજવો જોઈએ. ઉત્કૃષ્ટની અપેક્ષાએ વિચાર કરવામાં આવે તો ધર્માસ્તિકાયનો એક પ્રદેશ પોતાની ચારે દિશાઓના ધર્માસ્તિકાય પ્રદેશો દ્વારા અને ઉપર નીચેના બે પ્રદેશો દ્વારા સ્પૃષ્ટ થાય છે. આ રીતે ચાર દિશાઓના ચાર પ્રદેશો વડે, ઉપરના એક અને નીચેના એક, એમ છ પ્રદેશો વડે તેની સ્પર્શના થાય છે.

कायप्रदेशः कियद्भिः अधर्मास्तिकायप्रदेशैः स्पृष्टो भवति ? भगवानाह-' गोयमा ! जहन्नपए चउहिं, उक्कोसपए सत्तहिं ' हे गौतम ! जघन्यपदे-जघन्येन, चतुर्भिः अधर्मास्तिकायप्रदेशैः, उत्कृष्टपदे-उत्कृष्टेन सप्तभिः अधर्मास्तिकायप्रदेशैः एको धर्मास्तिकाय प्रदेशः स्पृष्टो भवति, तत्र जघन्यपदेन उपर्युक्तास्त्रयः, चतुर्थस्तु धर्मास्तिकायप्रदेशस्थानस्थितो विवक्षत इत्येवं चतुर्भिः उत्कृष्टपदेन च पूर्वोक्ताः षड्दिक्षट्के, सप्तमस्तु धर्मास्तिकायप्रदेशस्थ एवेत्येवं विवक्षितः, सप्तभिश्च अधर्मास्तिकायप्रदेशैः स्पृष्टो धर्मास्तिकायप्रदेश एक इत्यर्थः २। गौतमः पृच्छति-

---

अहमत्थिकायपएसेहिं पुट्ठे' हे भदन्त ! धर्मास्तिकायका एकप्रदेश कितने अधर्मास्तिकायप्रदेशों द्वारा स्पृष्ट होता है ? यह प्रश्न इसलिये पूछा गया है कि लोकाकाश में तिल में तैल की तरह धर्मादिक द्रव्य सर्वत्र भरे हुए हैं-अतः धर्मास्तिकाय जहां पर है वहीं पर अधर्मास्तिकाय आदि अन्य अस्तिकाय भी है। इसीलिये। पूछा जा रहा है कि धर्मास्तिकाय का एक विवक्षितप्रदेश अधर्मास्तिकाय के कितने प्रदेशों द्वारा स्पृष्ट होता है। इसके उत्तर में प्रभु कहते हैं-'गोयमा ! जहन्नपए चउहिं, उक्कोसपए सत्तहिं' हे गौतम ! धर्मास्तिकाय का एकप्रदेश जघन्य से अधर्मास्तिकाय के चार प्रदेशों द्वारा और उत्कृष्ट से सातप्रदेशों द्वारा स्पृष्ट होता हैं-वह इस प्रकार से-अधर्मास्तिकाय के एक ऊपर के प्रदेश से, आसपास के-आजूबाजू के दो प्रदेशों से तथा धर्मास्ति-

---

ગૌતમ સ્વામીનો પ્રશ્ન-" केवइएहिं अहमत्थिकायपएसेहिं पुट्ठे ?" હે ભગવન્ ! ધર્માસ્તિકાયનો એક પ્રદેશ અધર્માસ્તિકાયના કેટલા પ્રદેશો વડે સ્પૃષ્ટ થાય છે ? આ પ્રશ્ન પૂછવાનું કારણ એ છે કે જેમ તલમાં તેલ રહેલું હોય છે એમ લોકાકાશમાં ધર્માસ્તિકાય આદિ દ્રવ્ય સર્વત્ર વ્યાપ્ત હોય છે. તેથી જ્યાં ધર્માસ્તિકાય હોય છે, ત્યાં અધર્માસ્તિકાય આદિ અન્ય અસ્તિકાય પણ રહેલા હોય છે. તેથી જ એવો પ્રશ્ન પૂછવામાં આવ્યો છે કે ધર્માસ્તિકાયનો એક પ્રદેશ અધર્માસ્તિકાયના કેટલા પ્રદેશો વડે સ્પૃષ્ટ થાય છે ?

મહાવીર પ્રભુનો ઉત્તર-" गोयमा ! जहन्नपए चउहिं, उक्कोसपए सत्तहिं " હે ગૌતમ ! ધર્માસ્તિકાયનો એક પ્રદેશ અધર્માસ્તિકાયના ઓછામાં ઓછા ચાર પ્રદેશ વડે અને વધારેમાં વધારે સાત પ્રદેશો વડે સ્પૃષ્ટ થાય છે. ઓછામાં ઓછા ચાર પ્રદેશો વડે નીચે પ્રમાણે સ્પૃષ્ટ થાય છે-ધર્માસ્તિકાયનો તે એક પ્રદેશ અધર્માસ્તિકાયના એક ઉપરના પ્રદેશ વડે, આસપાસના બે પ્રદેશો વડે તથા ધર્માસ્તિકાયના પ્રદેશના સ્થાન પર રહેલા એક પ્રદેશ વડે

'केवइएहिं आगासत्थिकायपएसेहिं पुट्ठे ?' हे भदन्त ! कियद्भिः आकाशास्ति-कायप्रदेशैः एको धर्मास्तिकायप्रदेशः स्पृष्टः ? इति प्रश्नः, भगवानाह-' गोयमा ! सत्तहिं ' हे गौतम ! सप्तभिरेव आकाशास्तिकायप्रदेशैरेको धर्मास्तिकायप्रदेशः स्पृष्ट इति भावः । लोकान्तेऽपि अलोकाकाशप्रदेशानां सद्भावात् २, गौतमः पृच्छति-'केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे ?' हे भदन्त ! कियद्भिः जीवास्ति-कायप्रदेशैरेको धर्मास्तिकायप्रदेशः स्पृष्टः ? इति प्रश्नः भगवानाह-' गोयमा !

काय के प्रदेश के स्थान पर रहे हुए एकप्रदेश से-इस प्रकार जघन्य से चार प्रदेशों से उस धर्मास्तिकाय के एकप्रदेश की स्पर्शना कही गई है, तथा उत्कृष्ट से छह दिशाओं के छह प्रदेशों और सातवें धर्मा-स्तिकाय के प्रदेश के स्थान पर स्थित हुए एक अधर्मास्तिकाय के प्रदेश से इस प्रकार उस धर्मास्तिकाय के एक प्रदेश की स्पर्शना उत्कृष्ट से होती कही गई है। १ अब गौतम प्रभु से ऐसा पूछते हैं-'केवइएहिं आगासत्थिकायपएसेहिं पुट्ठे' हे भदन्त ! धर्मास्तिकाय का एकप्रदेश आकाशास्तिकाय के कितने प्रदेशों से स्पृष्ट होता है ? इसके उत्तर में प्रभु कहते हैं 'गोयमा' हे गौतम ! सात आकाशास्तिकाय प्रदेशों से एक धर्मास्तिकायप्रदेश स्पृष्ट होता है । क्योंकि लोकान्त में भी अलो-काकाश के प्रदेशों का सद्भाव है २ अब गौतम प्रभु से ऐसा पूछते हैं 'केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे' हे भदन्त ! जीवास्तिकाय के कितने

સ્પૃષ્ટ થાય છે. વધારેમાં વધારે સાત પ્રદેશો વડે આ પ્રકારે તેની સ્પર્શના સમજવી-ધર્માસ્તિકાયના તે એક પ્રદેશની છ દિશાઓના છ પ્રદેશો વડે અને ધર્માસ્તિકાયના પ્રદેશના સ્થાન પર રહેલા એક અધર્માસ્તિકાયના પ્રદેશ વડે સ્પર્શના થાય છે. આ રીતે ધર્માસ્તિકાયના એક પ્રદેશની અધર્માસ્તિકાયના વધારેમાં વધારે સાત પ્રદેશો વડે સ્પર્શના થાય છે. ।૨।

ગૌતમ સ્વામીનો પ્રશ્ન-" केवइएहिं आगासत्थिकायपएसेहिं पुट्ठे ?" હે ભગવન્! ધર્માસ્તિકાયના એક પ્રદેશની આકાશાસ્તિકાયના કેટલા પ્રદેશો વડે સ્પર્શના થાય છે ?

મહાવીર પ્રભુનો ઉત્તર-" गोयमा ! " હે ગૌતમ ! ધર્માસ્તિકાયનો એક પ્રદેશ આકાશાસ્તિકાયના સાત પ્રદેશો વડે સ્પૃષ્ટ થાય છે, કારણ કે લોકા-ન્તમાં પણ અલોકાકાશના પ્રદેશોનો સદ્ભાવ છે. ।૩।

ગૌતમ સ્વામીનો પ્રશ્ન-"केवइएहिं जीवत्थिकायपएसेहिं पुट्ठे ?" હે ભગવન્! ધર્માસ્તિકાયનો એક પ્રદેશ જીવાસ્તિકાયના કેટલા પ્રદેશો વડે સ્પૃષ્ટ થાય છે ?

अणंतेहिं' हे गौतम ! एको स्तिकायप्रदेशः अनन्तैः जीवास्तिकायप्रदेशैः स्पृष्टो भवति, तथाहि-अनन्तैरनन्तजीवसम्बन्धिनाम् अनन्तानां प्रदेशानाम् तत्रैक धर्मास्तिकायप्रदेशे पार्श्वतश्च दिक्त्रयादौ विद्यमानत्वात् ४, गौतमः पृच्छति-' केवइएहिं पोग्गलत्थिकायपएसेहिं पुट्ठे ?' हे भदन्त ! एको धर्मास्तिकायप्रदेशः कियद्भिः पुद्गलास्तिकायप्रदेशैः स्पृष्टो भवति ? भगवानाह-' गोयमा ! अणंतेहिं' हे गौतम ! एको धर्मास्तिकायप्रदेशः अनन्तैः पुद्गलास्तिकायप्रदेशैः स्पृष्टो भवति' अनन्तपुद्गलसम्बन्धिनामनन्तानां प्रदेशानां तत्रैकधर्मास्तिकायप्रदेशे पार्श्व-

---

